# Garbha Upanishad

# ગર્ભોપનિષત્ ૧૭

## Document Information

Text title : Garbha Upanishad

File name : garbha.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 17/108; Krishna-Yajur-Veda, Samanya Upanishad

Latest update : September 30, 1999, August 29, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગર્ભોપનિષત્ ૧૭

યદ્ગર્ભોપનિષદ્વેદ્યં ગર્ભસ્ય સ્વાત્મબોધકમ્ ।
શરીરાપહ્નવાત્સિદ્ધં સ્વમાત્રં કલયે હરિમ્ ॥

ૐ સહનાવવત્વિતિ શાન્તિઃ ॥

ૐ પઞ્ચાત્મકં પઞ્ચસુ વર્તમાનં ષડાશ્રયં
ષડ્ગુણયોગયુક્તમ્ ।
તત્સપ્તધાતુ ત્રિમલં દ્વિયોનિ
ચતુર્વિધાહારમયં શરીરં ભવતિ ॥

પઞ્ચાત્મકમિતિ કસ્માત્ પૃથિવ્યાપસ્તેજોવાયુરાકાશમિતિ ।
અસ્મિન્પઞ્ચાત્મકે
શરીરે કા પૃથિવી કા આપઃ કિં તેજઃ કો વાયુઃ કિમાકાશમ્ ।
તત્ર યત્કઠિનં સા પૃથિવી યદ્દ્રવં તા આપો યદુષ્ણં
તત્તેજો યત્સઞ્ચરતિ સ વાયુઃ યત્સુષિરં તદાકાશમિત્યુચ્યતે ॥

તત્ર પૃથિવી ધારણે આપઃ પિણ્ડીકરણે તેજઃ પ્રકાશને
વાયુર્ગમને આકાશમવકાશપ્રદાને । પૃથક્ શ્રોત્રે
શબ્દોપલબ્ધૌ ત્વક્ સ્પર્શે ચક્ષુષી રૂપે જિહ્વા રસને
નાસિકાઽઽઘ્રાણે ઉપસ્થશ્ચાનન્દનેઽપાનમુત્સર્ગે બુદ્ધ્યા
બુદ્ધ્યતિ મનસા સઙ્કલ્પયતિ વાચા વદતિ । ષડાશ્રયમિતિ
કસ્માત્ મધુરામ્લલવણતિક્તકટુકષાયરસાન્વિન્દતે ।
ષડ્જર્ષભગાન્ધારમધ્યમપઞ્ચમધૈવતનિષાદાશ્ચેતિ ।
ઇષ્ટાનિષ્ટશબ્દસંજ્ઞાઃ પ્રતિવિધાઃ સપ્તવિધા ભવન્તિ ॥ ૧॥

var પ્રણિધાનાદ્દશવિધા ભવન્તિ
શુક્લો રક્તઃ કૃષ્ણો ધૂમ્રઃ પીતઃ કપિલઃ પાણ્ડુર ઇતિ ।
સપ્તધાતુમિતિ કસ્માત્ યદા દેવદત્તસ્ય દ્રવ્યાદિવિષયા
જાયન્તે ॥ પરસ્પરં સૌમ્યગુણત્વાત્ ષડ્વિધો રસો

રસાચ્છોણિતં શોણિતાન્માંસં માંસાન્મેદો મેદસઃ
સ્નાવા સ્નાવ્નોઽસ્થીન્યસ્થિભ્યો મજ્જા મજ્જ્ઞઃ શુક્રં
શુક્રશોણિતસંયોગાદાવર્તતે ગર્ભો હૃદિ વ્યવસ્થાં
નયતિ । હૃદયેઽન્તરાગ્નિઃ અગ્નિસ્થાને પિત્તં પિત્તસ્થાને
વાયુઃ વાયુસ્થાને હૃદયં પ્રાજાપત્યાત્ક્રમાત્ ॥ ૨॥

ઋતુકાલે સમ્પ્રયોગાદેકરાત્રોષિતં કલિલં ભવતિ
સપ્તરાત્રોષિતં બુદ્બુદં ભવતિ અર્ધમાસાભ્યન્તરેણ પિણ્ડો
ભવતિ માસાભ્યન્તરેણ કઠિનો ભવતિ માસદ્વયેન શિરઃ
સમ્પદ્યતે માસત્રયેણ પાદપ્રવેશો ભવતિ । અથ ચતુર્થે માસે
જઠરકટિપ્રદેશો ભવતિ । પઞ્ચમે માસે પૃષ્ઠવંશો ભવતિ ।
ષષ્ઠે માસે મુખનાસિકાક્ષિશ્રોત્રાણિ ભવન્તિ । સપ્તમે
માસે જીવેન સંયુક્તો ભવતિ । અષ્ટમે માસે સર્વસમ્પૂર્ણો
ભવતિ । પિતૂ રેતોઽતિરિક્તાત્ પુરુષો ભવતિ । માતુઃ
રેતોઽતિરિક્તાત્સ્ત્રિયો ભવન્ત્યુભયોર્બીજતુલ્યત્વાન્નપુંસકો
ભવતિ । વ્યાકુલિતમનસોઽન્ધાઃ ખઞ્જાઃ કુબ્જા વામના
ભવન્તિ । અન્યોન્યવાયુપરિપીડિતશુક્રદ્વૈધ્યાદ્વિધા
તનુઃ સ્યાત્તતો યુગ્માઃ પ્રજાયન્તે ॥ પઞ્ચાત્મકઃ સમર્થઃ
પઞ્ચાત્મકતેજસેદ્ધરસશ્ચ સમ્યગ્જ્ઞાનાત્ ધ્યાનાત્
અક્ષરમોઙ્કારં ચિન્તયતિ । તદેતદેકાક્ષરં જ્ઞાત્વાઽષ્ટૌ
પ્રકૃતયઃ ષોડશ વિકારાઃ શરીરે તસ્યૈવે દેહિનામ્ । અથ
માત્રાઽશિતપીતનાડીસૂત્રગતેન પ્રાણ આપ્યાયતે । અથ
નવમે માસિ સર્વલક્ષણસમ્પૂર્ણો ભવતિ પૂર્વજાતીઃ સ્મરતિ
કૃતાકૃતં ચ કર્મ વિભાતિ શુભાશુભં ચ કર્મ વિન્દતિ ॥ ૩॥

નાનાયોનિસહસ્રાણિ દૃષ્ટ્વા ચૈવ તતો મયા ।
આહારા વિવિધા ભુક્તાઃ પીતાશ્ચ વિવિધાઃ સ્તનાઃ ॥

જાતસ્યૈવ મૃતસ્યૈવ જન્મ ચૈવ પુનઃ પુનઃ ।
અહો દુઃખોદધૌ મગ્નઃ ન પશ્યામિ પ્રતિક્રિયામ્ ॥

યન્મયા પરિજનસ્યાર્થે કૃતં કર્મ શુભાશુભમ્ ।
એકાકી તેન દહ્યામિ ગતાસ્તે ફલભોગિનઃ ॥

યદિ યોન્યાં પ્રમુઞ્ચામિ સાંખ્યં યોગં સમાશ્રયે ।

અશુભક્ષયકર્તારં ફલમુક્તિપ્રદાયકમ્ ॥

યદિ યોન્યાં પ્રમુચ્ચામિ તં પ્રપદ્યે મહેશ્વરમ્ ।
અશુભક્ષયકર્તારં ફલમુક્તિપ્રદાયકમ્ ॥

યદિ યોન્યાં પ્રમુચ્ચામિ તં પ્રપદ્યે
ભગવન્તં નારાયણં દેવમ્ ।
અશુભક્ષયકર્તારં ફલમુક્તિપ્રદાયકમ્ ।
યદિ યોન્યાં પ્રમુચ્ચામિ ધ્યાયે બ્રહ્મ સનાતનમ્ ॥

અથ જન્તુઃ સ્ત્રીયોનિશતં યોનિદ્વારિ
સમ્પ્રાપ્તો યન્ત્રેણાપીડ્યમાનો મહતા દુઃખેન જાતમાત્રસ્તુ
વૈષ્ણવેન વાયુના સંસ્પૃશ્યતે તદા ન સ્મરતિ જન્મમરણં
ન ચ કર્મ શુભાશુભમ્ ॥ ૪॥

શરીરમિતિ કસ્માત્
સાક્ષાદગ્રયો હ્યત્ર શ્રિયન્તે જ્ઞાનાગ્નિર્દર્શનાગ્નિઃ
કોષ્ઠાગ્નિરિતિ । તત્ર કોષ્ઠાગ્નિર્નામાશિતપીતલેહ્યચોષ્યં
પચતીતિ । દર્શનાગ્ની રૂપાદીનાં દર્શનં કરોતિ ।
જ્ઞાનાગ્નિઃ શુભાશુભં ચ કર્મ વિન્દતિ । તત્ર ત્રીણિ
સ્થાનાનિ ભવન્તિ હૃદયે દક્ષિણાગ્નિરુદરે ગાર્હપત્યં
મુખમાહવનીયમાત્મા યજમાનો બુદ્ધિં પત્નીં નિધાય
મનો બ્રહ્મા લોભાદયઃ પશવો ધૃતિર્દીક્ષા સન્તોષશ્ચ
બુદ્ધીન્દ્રિયાણિ યજ્ઞપાત્રાણિ કર્મેન્દ્રિયાણિ હવીંષિ શિરઃ
કપાલં કેશા દર્ભા મુખમન્તર્વેદિઃ ચતુષ્કપાલં
શિરઃ ષોડશ પાર્શ્વદન્તોષ્ઠપટલાનિ સપ્તોત્તરં
મર્મશતં સાશીતિકં સન્ધિશતં સનવકં સ્નાયુશતં
સપ્ત શિરાસતાનિ પઞ્ચ મજ્જાશતાનિ અસ્થીનિ ચ હ
વૈ ત્રીણિ શતાનિ ષષ્ટિશ્ચાર્ધચતસ્રો રોમાણિ કોટ્યો
હૃદયં પલાન્યષ્ટૌ દ્વાદશ પલાનિ જિહ્વા પિત્તપ્રસ્થં
કફસ્યાઢકં શુક્લં કુડવં મેદઃ પ્રસ્થૌ દ્વાવનિયતં
મૂત્રપુરીષમાહારપરિમાણાત્ । પૈપ્પલાદં મોક્ષશાસ્ત્રં
પરિસમાપ્તં પૈપ્પલાદં મોક્ષશાસ્ત્રં પરિસમાપ્તમિતિ ॥

ૐ

સહ નાવવત્વિતિ શાન્તિઃ ॥

ઇતિ ગર્ભોપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*Garbha Upanishad*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*